श्री गायत्री नामाष्टाविंशति स्तोत्रं

श्री गायत्री नामाष्टाविंशति स्तोत्रं

श्रीगणेशाय नमः ||

ब्रह्मोवाच |
शताक्षरात्मकं देव्या नामाष्टाविंशतिः शतं |
शृणु वक्ष्याभि तत्सर्वमतिगुह्यं सनातनं || 1||

भूतिदा भुवना वाणी वसुधा सुमना मही |
हरिणी जननी नंदा सविसर्गा तपस्विनी || 2||

पयस्विनी सती त्यागा चैंदवी सत्यवीरसा |
विश्वा तुर्या परा रेच्या निर्घृणी यमिनी भवा || 3||

गोवेद्या च जरिष्ठा च स्कंदिनी धीर्मतिर्हिमा |
भीषणा योगिनी पक्षी नदी प्रज्ञा च चोदिनी || 4||

धनिनी यामिनी पद्मा रोहिणी रमणी ऋषिः |
सेनामुखी सामयी च बकुला दोषवर्जिता || 5||

सर्वकामदुघा सोमोद्भवाऽहंकारवर्जिता |
द्विपदा च चतुष्पादा त्रिपदा चैव षट्पदा || 6||

अष्टापदी नवपदी सा सहस्राक्षरात्मिका |
इदं यः परमं गुह्यं सावित्रीमंत्रगर्भितं || 7||

नामाष्टविंशतिशतं शृणुयाच्छ्रावयेत्पठेत् |
मर्त्यानाममृतत्वाय भीतानामभयाय च || 8||

मोक्षाय च मुमुक्षूणां श्रीकामान् प्राप्तये श्रियः |
विजयाय युयुत्सूनां व्याधितानामरोगकृत् || 9||

वश्याय वश्यकामानां विद्यायै वेदकामिनां |
द्रविणाय दरिद्राणां पापिनां पापशांतये || 10||

वादिनां वादविजये कवीनां कविताप्रदं | वादविषये
अन्नाय क्षुधितानां च स्वर्गाय नाकमिच्छतां || 11|| स्वर्गार्थं

पशुभ्यः पशुकामानां पुत्रेभ्यः पुत्रकांक्षिणां |
क्लेशिनां शोकशांत्यर्थं नृणां शत्रुभयाय च || 12||

राजवश्याय द्रष्टव्यं परमं नृपसेविनां |
भक्त्यर्थं विष्णुभक्तानां विष्णौ सर्वांतरात्मनि || 13||

नायकं विधिसृष्टानां शांतये भवति ध्रुवं |
निःस्पृहाणां नृणां मुक्तिः शाश्वती भवति ध्रुवं || 14||

जप्यं त्रिवर्गसंयुक्तं गृहस्थेन विशेषतः |
मुनीनां ज्ञानसिद्ध्यर्थं यतीनां मोक्षसिद्धये || 15||

उद्यतं चंद्रकिरणमुपस्थाय कृतांजलिः |
कानने वा स्वभवने तिष्ठन् शुद्धो जपेदिदं || 16||

सर्वान् कामानवाप्नोति तथैव शिवसन्निधौ |
मम प्रीतिकरं दिव्यं विष्णुभक्तिविवर्धनं || 17||

ज्वरार्तानां कुशाग्रेण मार्जयेत्कुष्ठरोगिणां |
अंगमंगं यथालिंगं कवचेन तु साधकः || 18||

मंडलेन विशुध्येत सर्वरोगैर्न संशयः |
मृतप्रजा च या नारी जन्मवंध्या तथैव च || 19||

कन्यादिवंध्या या नारी तासामंगं प्रमार्जयेत् |
पुत्रा नरोगिणस्तास्तु लभंते दीर्घजीविनः || 20||

तास्ताः संवत्सरादर्वाक् गर्भं तु दधिरे पुनः |
पतिविद्वेषिणी या स्त्री अंगं तस्याः प्रमार्जयेत् || 21||

तमेव भजते सा स्त्री पतिं कामवशं नयेत् |
अश्वत्थे राजवश्यार्थं बिल्वमूले स्वरूपभाक् || 22||

पालाशमूले विद्यार्थी तेजसोऽभिमुखो रवौ |
कन्यार्थी चंडिकागेहे जपेच्छत्रुभयाय च || 23||

श्रीकामो विष्णुगेहे च उद्याने श्रीर्वशीभवेत् |
आरोग्यार्थे स्वगेहे च मोक्षार्थी शैलमस्तके || 24||

सर्वकामो विष्णुगेहे मोक्षार्थी यत्र कुत्रचित् |
जपारंभे तु हृदयं जपांते कवचं पठेत् || 25||

किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः |
यं यं चिंतयते नित्यं तं तं प्राप्नोति निश्चितं || 26||

इति श्रीमद्वसिष्ठसंहितायां ब्रह्मनारदसंवादे
गायत्रीनामाष्टाविंशतिस्तोत्रं समाप्तं ||